# ‘‘छात्राणां मूल्यांङ्कनार्थं परीक्षापयोगी प्रश्नावली’’

निर्मात्री
प्रो. ग़ज़ाला अंसारी
साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्
लखनऊपरिसरः, लखनऊ

# टिप्पणी

एते सर्वे प्रश्नाः छात्राणां मूल्याङ्कनार्थं सम्प्रेषिताः। मन्ये, यदि समाधानपुरस्सरं प्रश्नाः सञ्जाताः तर्हि छात्राणां मूल्याङ्कनं कथं भवितुमर्हति इति धिया प्रश्नोच्चयः एवाऽत्र प्रस्तूयते। सर्वेषां छात्राणां सविधे या पाठ्यसामग्री वर्तते, तासामेव एतेषां प्रश्नानां समाधानं वरीवर्ति। ते ध्यानेन पठित्वा तेषाम् अन्वेषणं कुर्वन्तु। समाधानं कृत्वा मां सूचयन्तु। यदि काचित् समस्या भवेच्चेत मां सम्पर्कयन्तु।

निर्मात्री
प्रो. ग़ज़ाला अंसारी
साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्
लखनऊपरिसरः, लखनऊ

# आचार्यद्वितीयवर्षः

## तृतीयपत्रम्

## रसगङ्गाधरः (प्रथमाननम्)

1- पण्डितराजमते वीरः कतिविधः ?

2. 'व्यक्तिरश्च भग्नवारणा चेत्' इत्यत्र 'भग्नवारणा' अर्थं निर्दिशत ।

3. तादात्म्येन रस प्रतीतावनास्वाद्यत्वम् इति कस्य मतम् ? किञ्च अनेन आभिप्रैति ग्रन्थकारः ।

4. 'भाव्यमानो विभाव एव रसः' इत्यस्य अर्थं विलिख्य समीक्ष्यताम् ।

5. जगन्नाथमते रसाः कतिविधाः ? नामानि अपि लिख्यताम् ।

6. अनौचित्याद्दृते नान्यद् रसभङ्गस्य कारण-मिति कुत्रोपन्यस्तम् ?

7. जगन्नाथमते कति शब्दगुणाः सन्ति ?

20

②

8. जगन्नाथस्य व्याकरणशास्त्रगुरुः कः ?

9. कति व्यभिचारिभावाः सन्ति ?

10. कः प्रथमः अर्थगुणः अस्ति ?

11. पण्डितराजोक्तं समतालक्षणं लिखत ।

12. 'हर्ष' इत्याख्यस्य व्यभिचारिणः लक्षणम् उदाहरणञ्च लिखत ।

13. 'प्रसाद' इत्यर्थगुणस्य लक्षणम् उदाहरणञ्च लिखत ।

14. 'सुकुमारता' इति शब्दगुणस्य लक्षणम् उदाहरणञ्च लिखत ।

15. समाधिनामकस्य शब्दगुणस्य लक्षणमुदाहरणञ्च लिखत ।

16. मोहनामकस्य व्यभिचारिणः लक्षणमुदाहरणञ्च लिखत ।

17. भावोदयस्य लक्षणोदाहरणञ्च लिखत ।

18. भावशबलतायाः लक्षणम् उदाहरणञ्च लिखत ।

19. 'परोत्कर्षदर्शनादिजन्यः परनिन्दाकारणी-भूतश्चित्तवृत्तिविशेषोऽसूया' इति लक्षणं व्याख्यायताम् ।

20. व्यक्तस्तैर्विभावाद्यैः अत्र 'व्यक्तः' इति पदस्य रसगङ्गाधरे कोऽर्थः ?

21. 'रसोद्बोधसमर्थस्यैवाऽत्र लक्ष्यत्वम् इत्यपि परास्तम्' इति पङ्क्तेराशयो विशदी-क्रियताम् ।

22. 'अन्तःकरणधर्माणां साक्षिभास्यत्वाभ्यु-पगतेः' इति पङ्क्तेराशयं विशदयत ।

23. रसविषये भट्टनायकस्य विचारान् निरूपयत ।

24. रसदोषान् वर्णयत ।

25. 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' इति सूत्रस्य व्याख्या कार्या ।

26. रसानां परस्परमविरोधं प्रदर्शयत ।

27. सलक्षणोदाहरणम् अद्भुतरसं वर्णयत ।

28. "अनुचितविभावालम्बनत्वं रसाभासत्वम्" इति व्याख्यायताम् ।

29. पण्डितराजदिशा शान्तरसस्य स्थापना क्रियताम् ।

30. 'नत्यास्तु काव्ये नाट्ये च' इत्यादिरूपेण उपस्थापितं रसस्वरूपं प्रतिपाद्यताम् ।

31. सुराङ्गनाभिराश्लिष्टा व्योम्नि - —— देहान् केरुनारीभिरावृतान् ।। इत्यत्र विरोधीरसनिवेशो न दोष इति स्वग्रन्थादिशा प्रतिपादयत

32. माधुर्यौजः प्रसादानां त्रयाणां गुणानां रसमात्रधर्मत्वं जगन्नाथदर्शितदिशा साधयत ।

33. "कृतमनुमतं दृष्ट्वा" इत्यत्र पद्ये कस्मात् कारणात् रौद्रव्यञ्जनक्षमत्वं नास्तीति विवेचयत ।

34. "चराचरजगज्जालसदनं वदनं तव ।
गलद्गगनगाम्भीर्यं वीक्ष्याऽस्मि हृतचेतना" ।।

35. इति पद्यं व्याख्याय विस्मयस्यात प्राधान्यं प्रतिपादयत ।

36. पण्डितराजानुसारेण शृङ्गाररसस्य स्थापना क्रियताम् ।

37. पण्डितराजदिशा हास्यरसस्य लक्षणम् उदाहरणञ्च लिखत ।

38. रसाभास: क: ? तस्य विवेचनं क्रियताम् ।

39. रसदोषपरिहारविषये जगन्नाथमतस्य व्याख्या कार्या ।

40. करुणरसस्य लक्षणोदाहरणपुरस्सरं स्थापना क्रियताम् ।

41. शब्दगुणानां नामानि विलिख्य कस्य-चिदेकस्य लक्षणम् उदाहरणञ्च विवेचयत ।

42. माधुर्याख्यस्य शब्दगुणस्य लक्षणम् उदाहरणम् च व्याख्येयम् ।

43. अर्थगुणानां नामानि विलिख्य कस्यचिद् एकस्य लक्षणम् उदाहरणञ्च विवेचयत ।

44. श्लेषनामकस्य अर्थगुणस्य लक्षणम् उदाहरणञ्च व्याख्येयम् ।

45. व्यभिचारिभावानां नामानि विलिख्य कस्यचिदेकस्य लक्षणम् उदाहरणञ्च विवेचयत ।

46. भावध्वनेः लक्षणम् उदाहरणञ्च लिखत ।

47. भावसन्धिस्वरूपं सोदाहरणं विवेचयत ।

48. भावभासस्य स्वरूपं सोदाहरणं विवेचयत ।

49. भावशबलतास्वरूपं सोदाहरणं विवेचयत । (25)

50. जगन्नाथानुसारेण गुणस्वरूपं विवेचनीयम् ।

51. सलक्षणोदाहरणं वीररसं वर्णयत ।

52. 'अनुचितविभावालम्बनत्वं रसाभासत्वम्' इति व्याख्यायताम् ।

53. पाण्डुराजदृशा भयानकरसस्य स्थापना क्रियताम् ।

54. सलक्षणोदाहरणं हास्यरसं वर्णयत ।

55. बीभत्सरसस्य स्वरूपं किं स्थापयत ।

56. जगन्नाथानुसारेण रौद्ररसस्य स्वरूपं स्थापयत ।

57. 'कुण्डलीकृतकोदण्डदोर्दण्डस्य पुरस्तव' इत्यस्य व्याख्या कार्या ।

58. जगन्नाथोक्तान् ध्वनिसामान्यभेदान् लिखत ।

59. 'गुणालङ्कारादिभिर्निरूपणीयैतस्मिन्' इति अस्यार्थो लेख्यः ।

60. पाण्डितराजजगन्नाथस्य व्यक्तित्वं लिखत ।

61. साहित्यशास्त्रे रसगङ्गाधरस्य महत्त्वं प्रतिपादयत ।

62. अलङ्कारशास्त्रे पण्डितराजजगन्नाथस्य अवदानं निरूप्यताम् ।

63. 'रसगङ्गाधरः' इति ग्रन्थस्य वैशिष्ट्यानि लिखत ।

64. पण्डितराजजगन्नाथस्य रचनाविषये अपि च तस्य विभिन्नशास्त्राणां गुरूणां विषये निबन्धो लेख्यः ।

65. पण्डितराजजगन्नाथस्य जीवनपरिचयः लेखनीयः ।

66. रसगङ्गाधरादौ प्रदर्शितां पण्डितराजगुरुपरम्परां प्रदर्शयत ।